लीपिकै वासे दर्भसों लकीरैं करै अर्थात दर्भसों ऊर्ध्वरेखा कर बीचमें अनामिका और अँगूठेसों उठाके जलसों छिरकि वहां अग्निको स्थापित करि क्रव्याद है नाम जाको अर्थात् कच्चे मांसके भक्षक वह्निको फूल आदिसों पूजन करि "लोमभ्यःस्वाहा त्वग्भ्यःस्वाहा मांसेभ्यः स्वाहा" इत्यादि अनुवाक वेदमंत्रकरि विधिपूर्वक होम करै ॥ १७ ॥ क्रव्याद है नाम जाको ऐसो देव अग्नि हैं तिनकी फूल अक्षतोंसे पूजा करि लोमनसों अनुवाक करि यथाविधि होमको करै ॥ १८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तुम भूतनके धारण करनहारे हो और जगत्की योनि कहिये उत्पत्तिस्थान हो और तुम भूतनके पालनहारे हौ ताते मरोभयो जो यह सांसारिक है ताको तुम स्वर्गकी गतिको पहुँचाओ ॥ १९ ॥ ऐसे अग्निकी प्रार्थना करि वहांई चंदन तुलसीके काष्ठ पलाश तथा पीपलकी लकरीनसों चिता बनावै ॥ २० ॥ वा प्रेतको चितामें धरिकै वहां चितामें प्रेतके हाथपर प्रेतके नामसों दो पिंड देवै चिताके

त्वंभूतभृज्जगद्योनिस्त्वंभूतपरिपालकः ॥ मृतः सांसारिकस्तस्मादेनंत्वस्वगतिंनय ॥ १९ ॥ इतिसंप्रार्थयित्वाग्निचितांतत्रैवकारयेत् ॥ श्रीखण्डतुलसीकाष्ठैः पलाशाश्वत्थदारुभिः ॥ २० ॥ चितामारोप्यतंप्रेतंपिंडौद्वौ तत्रदापयेत् ॥ चितायांशवहस्तेचप्रेतनाम्नाखगेश्वर ॥ चितामोक्षप्रभृतिकंप्रेतत्वमुपजायते ॥ २१ ॥ केपितं साधकं प्राहुःप्रेतकल्पविदोजनाः ॥ चितायांतेननाम्नावाप्रेतनाम्नाथवाकरे ॥ २२ ॥ इत्येवंपञ्चभिः पिण्डैःशवस्याहुतियोग्यता ॥ अन्यथाचोपघातायपूर्वोक्तास्तेभवंतिहि ॥ २३ ॥ प्रेतेदत्त्वापञ्चपिंडान्हुतमादायतंतृणैः अग्निपुत्रस्तदादद्यान्नभवेत्पञ्चकंयदि ॥ २४ ॥

छोडनेसे लगाके प्रेतत्व होय है ॥२१॥ कोई प्रेतकल्पके जाननहारे वाको साधक कहैं हैं चितामें वा नामसों अथवा प्रेतके नामसों हातहीमें देवै ॥ २२ ॥ या प्रकार पांच पिंडनसों शवकी आहुतिकी योग्यता होय है अन्यथा कहिये पांच पिंड न देनेसों पहले कहे भये वे विघ्नके लिये उपस्थित होय हैं ॥ २३ ॥ प्रेतको पांच पिंड देकै पहले "लोमभ्यः स्वाहा" या अनुवाकसों होमीगई वाही अग्निकोतृणनमेंलेके

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुत्र अग्नि देवै और जे अग्निहोत्री हैं उनको अग्निहोत्रते लेक देवै जो पंचक न होय तो ॥ २४ ॥ और जो नर पंचकमें मरै है वह गतिको नहीं प्राप्त होय है पंचकमें दाह न करनो चाहिये जो कियोजाय तो दूसरेको मरण होय॥२५॥आदिमें आधी धनिष्ठाते लगाकै अंतमें रेवतीतक ये पांच नक्षत्र दाहमें योग्य नहीं हैं और जो दाह करै तौ शुभ न होय ॥ २६ ॥ जो इन पंचनक्षत्रमें मरैहै ताके घरमें

पञ्चकेषुमृतोयस्तुनगतिंलभतेनरः ॥ दाहस्तत्रनकर्तव्यः कृतेन्यमरणंभवेत् ॥ २५ ॥ आदौकृत्वाधनिष्ठार्धमे तन्नक्षत्रपञ्चकम्॥रेवत्यन्तंनदाहेर्हंदाहेचनशुभंभवेत् ॥ २६ ॥ गृहेहानिर्भवेत्तस्यऋक्षष्वेषुमृतोहि यः॥पुत्राणांगो त्रिणांचापिकश्चिद्विघ्नः प्रजायते ॥ २७ ॥ अथवाऋक्षमध्येहिदाहःस्याद्विधिपूर्वकः ॥ तद्विधिंतेप्रवक्ष्यामिस र्वदोषप्रशान्तये ॥ २७ ॥ शवस्यनिकटेताक्ष्यनिक्षिपेत्पुत्तलांस्तदा ॥ दर्भमयांश्चचतुरऋक्षमन्त्राभिमन्त्रि तान् ॥ २९ ॥ तप्तहेमप्रकर्त्तव्यंवहन्तिऋक्षनामभिः ॥ प्रेताजयतमन्त्रेणपुनर्होमस्तुसंपुटैः ॥ ३० ॥

हानि होय है पुत्रनमें तथा गोत्रवालेनमें कोई विघ्न होय है ॥ २७ ॥ अथवा नक्षत्रहीके मध्यमें विधिपूर्वक दाह होय है सब दोषनकी शांतिके लिये वा विधिको मैं तुमसों कहोंगो ॥ २८ ॥ हे गरुड ! शवके निकट चारिपुत्तलनको डारै वे पुत्तल दर्भके बने होय और नक्षत्रनके मंत्रनसों अभिमंत्रित होंय ॥ २९ ॥ सोना तपावनो चाहिये और 'प्रेताजयत' या मंत्रसों प्रेतना को

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संपुटित करिकै होम करनो चाहिये ॥ ३० ॥ ता पीछे उन पुत्तलनके साथ दाह करनो और पुत्र सपिंडीके दिन बाकी शांति विधिको करै ॥ ३१ ॥ तिलको पात्र और सुवर्ण रूपा रत्न इनको यथाक्रम काँसेके पात्रमें घी भरिकै दोषकी शांतिके लिये दान करै ॥ ३२ ॥ ऐसे शांति विधानको करिकै जो दाह करै है ताके विघ्न नहीं होय हैं और प्रेत परमगतिको प्राप्त होय है ॥ ३३ ॥ ऐसे पंचकमें

ततोदाहः प्रकर्तव्यस्तैश्चपुत्तलकैः सह ॥ सपिंडनदिनेकुर्यात्तस्यशान्तिविधिंसुतः ॥ ३१ ॥ तिलपात्रंहिरण्यंचरूप्यंरत्नंयथाक्रमम् ॥ घृतपूर्णकांस्यपात्रंदद्याद्दोषप्रशान्तये ॥ ३२ ॥ एवंशान्तिविधानंतुकृत्वादाहंकरोतियः ॥ नतस्यविघ्नोजायेतप्रेतायान्तिपराङ्गतिम् ॥ ३३ ॥ एवंपञ्चकदाहः स्यात्तद्विनाकेवलंदहेत्॥सती यदिभवेत्पत्नीतयासहविनिर्दहेत् ॥ ३४ ॥ पतिव्रतायदानारीभर्तुः प्रियहितेरता ॥ इच्छेत्सहैवगमनंतदास्नानंसमाचरेत् ॥३५॥ कुंकुमांजनसद्वस्त्रभूषणैर्भूषितांतनुम् ॥ दानंदद्याद्द्विजातिभ्योबन्धुवर्गेभ्यएवच ॥ ३६ ॥

दाह होय है वा पंचकके विना अकेलेहीको जरावै जो पत्नी सती स्त्री होय तो वाके साथ जरावै ॥ ३४ ॥ जो नारी पतिव्रता होय और पतिके हितमें तत्पर होय और साथही जानो चाहै तौ स्नान करै ॥ ३५ ॥ कुंकुम अंजन उत्तम वस्त्र भूषणसों शरीरको भूषितकरै और ब्राह्मणनको दान दे और बंधुवर्गको देय ॥ ता पीछे गुरुको नमस्कार करिकै तब घरतें बाहर निकलै ता पीछे देवालयमें

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जाकै भक्तिसों उन हरिको प्रणाम करै ॥३६॥३७॥ वहां आभरण देकै और श्रीफलको ग्रहण करि लज्जा तथा मोहको छोडि श्मशान भव जो मुर्दघटा है ताको जाय ॥ ३८ ॥ वहां सूर्यको नमस्कार करि और चिताकी परिक्रमा करि तब फूलनकी सेजपर चढै और अपनी गोदीमें पतिको सुवावै ॥ ३९ ॥ सखीनको श्रीफल देय ता पीछे दाहकी आज्ञा देवे गंगास्नानके समान शीतल जानि शरीरको

गुरुंनमस्कृत्यतदानिर्गच्छेन्मन्दिराद्बहिः॥ ततोदेवालयंगत्वाभक्त्यातंप्रणमेद्धरिम् ॥ ३७ ॥ समर्प्याभरणं तत्रश्रीफलंपरिगृह्यच ॥ लज्जांमोहपरित्यज्यश्मशानभवनंव्रजेत् ॥ ३८ ॥ तत्रसूर्यंनमस्कृत्यपरिक्रम्यचितां तदा ॥ पुष्पशय्यांतदारोहेन्निजांकेस्वापयेत्पतिम् ॥ ३९ ॥ सखिभ्यः श्रीफलंदद्याद्दाहमाज्ञापयेत्ततः ॥ गङ्गास्नानसमंज्ञात्वाशरीरंपरिदाहयेत् ॥ ४० ॥ नदहेद्गर्भिणीनारीशरीरंपतिनासह ॥ जनयित्वाप्रसूतिंचबालंपोष्यसतीभवेत् ॥ ४१ ॥ नारीभर्तारमासाद्यशरीरंदहतेयदि ॥ अग्निर्दहतिगात्राणिनैवात्मानंप्रपीडयेत् ॥४२॥

जरावै ॥ ४० ॥ गर्भिणी स्त्री पतिके साथ शरीरको न जरावै किंतु संततिको उत्पन्न करि वाको पालन करिकै फिरि सती होय ॥४१॥ जो नारी भर्ताको प्राप्त हो जो शरीरको जरावै है तो अग्नि वाके शरीरको जराय देय है और आत्माको पीडा नहीं देय है ॥ ४२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जैसे आगिमें धौंकीभई धातूनको मल जरिजाय है वैसेही नारी अमृतके समान जो अग्नि है तामें पापको जराय देयहै ॥ ४३ ॥ दिव्य
जो शपथ आि हैं तिनमें सत्ययुक्त धर्मात्मा मनुष्य शुद्ध होय है और तपायेभये लोहके पिंडसों कभी नहीं जरे है ॥ ४४ ॥ ऐसेही
वह स्त्री पतिके साथ पतिसमेत कभी नहीं जरती है अंतरात्मा मरेभये भर्त्ताके आत्माके साथ एकताको प्राप्त होजायहै ॥ ४५ ॥ पतिके

दह्यतेध्मायमानानांधातूनांचयथामलः ॥ तथानारीदहेत्पापंहुताशेह्यमृतोपमे ॥ ४३ ॥ दिव्यादौसत्ययुक्त
श्चशुद्धोधर्मयुतोनरः ॥ यथानदह्यतेतप्तलोहपिण्डनकर्हिचित् ॥ ४४ ॥ तथासापतिसंयुक्तादह्यतेनकदाचन ॥
अन्तरात्मात्मनाभर्तुर्मृतस्यैकत्वमाप्नुयात् ॥ ४५ ॥ यावच्चाग्नौमृतेपत्यौस्त्रीनात्मानंप्रदाहयेत् ॥ तावन्नमुच्य
तेसाहिस्त्रीशरीरात्कथंचन ॥ ४६ ॥ तस्मात्सर्वप्रयत्नेनस्वपतिंसेवयेत्सदा ॥ कर्मणामनसावाचामृतेजीव
तितद्गता ॥४७॥ मृते भर्त्तरियानारीसमारोहेद्धुताशनम् ॥ साऽरुन्धतीसमाभूत्वास्वर्गलोकेमहीयते ॥ ४८ ॥

मरनेपै जबलौं स्त्री अपनी देहको नहीं जरावै है तबलौं वह स्त्रीके शरीरतें कभी नहीं छूटै है ॥ ४६ ॥ तातें सब यत्नसों कर्मसों मनसों
वचनसों सदा जीवते भये अपने पतिको सेवन करै और मरनेपै वाके साथ जाय ॥ ४७ ॥ भर्त्ताके मरनपै जो नारी अग्निमें प्रवेश
करै है वह अरुंधतीके समान होकै स्वर्गलोकमें आनंद करै है ॥ ४८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भर्तासेहू अधिक शोभायमान है रूप जाको ऐसी वह अप्सरानके गणनकरि स्तुति करीगई नारी जबलौं चौदह इंद्र रहैं हैं तबलौं पतिके साथ विहार करै है ॥ ४९ ॥ माताके पिताके और जहां वह व्याही जाय इन तीनों कुलनको भर्ताके साथ जानेवाली स्त्री पवित्र करै ॥ ५० ॥ साढे तीनि करोडि जो रोम मनुष्यनकी देहमें हैं उतने कालपर्यंत वह स्त्री स्वर्गलोकमें पतिके साथ आनंद करैहै ॥ ५१ ॥

तत्रसाभर्तृपरमास्तूयमानाप्सरोगणैः ॥ रमतेपतिनासार्धंयावदिन्द्राश्चतुर्दश ॥ ४९ ॥ मातृकंपैतृकंचैवय त्रसाचप्रदीयते ॥ कुलत्रयंपुनात्यत्रभर्तारंयानुगच्छति ॥५०॥ तिस्रः कोटयोर्द्धकोटीचयानिरोमाणिमानुषे ॥ तावत्कालंवसेत्स्वर्गेपतिनासहमोदते ॥ ५१ ॥ विमानेसूर्यसंकाशेक्रीडतेरमणेनसा ॥ यावदादित्यचन्द्रौचभ र्तृलोकेचिरंवसेत् ॥ ५२ ॥ पुनश्चिरायुः साभूत्वाजायतेविमलेकुले ॥ पतिव्रतातुयानारीतमेवलभतेप तिम् ॥ ५३ ॥ याक्षणंदाहदुःखेनसुखमेतादृशंत्यजेत् ॥ सामूढाजन्मपर्यंतंदह्यतेविरहाग्निना ॥ ५४ ॥

सूर्यकीसी है कांति जाकी ऐसे विमानमें पतिके साथ विहार करैहै और जबलौं सूर्य चंद्रमा प्रकाश करै तबलौं भर्ताके लोकमें चिरकाल वास करै ॥५२॥ फिरि अधिक उमर पाकै निर्मल कुलमें उत्पन्न होय और पतिव्रता नारी वाही पतिको प्राप्त होय है ॥ ५३ ॥ जो क्षणभरके दाहके दुःखसों ऐसो सुखको छोडि देय है वह मूर्ख जन्मपर्यंत विरहकी आगिसों तपाई जाय है ॥ ५४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तातें पतिको शिव जानि वाके साथ शरीरको जरावै है हे गरुड ! जो सती न होय है तौ वाको या प्रकार जरावै ॥५५॥ आधा दग्ध होनेपै अथवा पूरा दग्ध होनेपै वा मृतकके मस्तकको फोडै गृहस्थोंके मस्तकको काष्ठसों और यतिनके मस्तकको श्रीफलसे फोडे ॥ ५६ ॥ ब्रह्मलोकनकी प्राप्तिके लिये वाके ब्रह्मरंध्रको भेदन करि तापीछे वाको पुत्र या मंत्रसों घीकी आहुति देय ॥ ५७ ॥ हे पावक!

तस्मात्पतिंशिवंज्ञात्वासहतेनदहेत्तनुम् ॥ यदिनस्यात्सतीतार्क्ष्यतमेवंप्रदहेत्तदा ॥ ५५ ॥ अर्धेदग्धेऽथवापूर्णेस्फोटयेत्तस्यमस्तकम् ॥ गृहस्थानांतुकाष्ठनयतीनांश्रीफलेनच ॥ ५६ ॥ प्राप्तयेपितृलोकानांभित्त्वातद्ब्रह्मरन्ध्रकम् ॥ आज्याहुतिंततोदद्यान्मन्त्रेणानेनतत्सुतः ॥ ५७ ॥ अकारादभिजातोसित्वदयंजायतांपुनः॥ असौस्वर्गायलोकायस्वाहाज्वलतुपावक ॥ ५८ ॥ एवमाज्याहुतिंदत्त्वातिलमिश्रांसमन्त्रकाम् ॥ रोदितव्यंततोगाढंतेनतस्यसुखं भवेत ॥ ५९ ॥ दाहादनन्तरंकार्यंस्त्रीभिःस्नानंततः सुतैः ॥तिलोदकंततोदद्यान्नामगोत्रोपकल्पितम् ॥ ६० ॥

तुम वासुदेवतें उत्पन्न हौ और तुमसों स्वगलोकके लिये अर्थात् स्वर्गमें जानेको तेजोमय दिव्यशरीरसों उत्पन्न होय है यह स्थूलदेह तुममें हवि होऊ यातें तुम प्रज्ज्वलित होऊ ॥५८॥ याप्रकार तिलयुक्त मंत्रसहित घीकी आहुति देकै ता पीछे खूब रोवनो चाहिये तासों प्राणीको सुख होय है ॥ ५९ ॥ दाहके पीछे पहले स्त्रीनको और पीछे पुत्रनको स्नान करनो चाहिये ता पीछे नाम और

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोत्रको उच्चारण करि तिलांजलि देय ॥६०॥ नींबूकी पत्ती दांतनसों कतरै और मृतकके गुणनको कहै पहले स्त्रीजन घरको जांय तापीछे मनुष्यनको समूह जाय ॥ ६१ ॥ घरमें फिरि स्नान करिकै गोग्रास देय पत्रावलीमें भोजन करै घरको अन्न न खाय ॥ ६२ ॥ तापीछे दक्षिणको मुख करि मृतकके स्थानको लीपै फिर बारह दिनलौं रातदिन दीपक जगावै ॥ ६३ ॥ हे गरुड ! सूर्यके अस्त होनेपै

प्राशयेन्निम्बपत्राणिमृतकस्यगुणान्वदेत ॥ स्त्रीजनोग्रेगृहंगच्छेत्पृष्ठतोनरसञ्चयः ॥ ६१ ॥ गृहेस्नानंपुनः कृत्वागोग्रासंचप्रदायेत ॥ पत्रावल्यांचभुञ्जीयाद्गृहान्ननैवभक्षयेत् ॥ ६२ ॥ मृतकस्थानमालिप्यदक्षिणाभिमुखंततः ॥ द्वादशाहकपर्यन्तदीपंकुर्यादहर्निशम् ॥ ६३ ॥ सूर्येस्तमागतेतार्क्ष्यश्मशानेवाचतुष्पथे ॥ दुग्धंचमृन्मयेपात्रेतोयंदद्याद्दिनत्रयम् ॥६४॥ अपक्वमृन्मयंपात्रंक्षीरनीरप्रपूरितम् ॥ काष्ठत्रयंगुणैर्बद्धंधृत्वामन्त्रंपठेदिमम् ॥ ६५ ॥श्मशानानलदग्धोसिपरित्यक्तोसिबान्धवैः ॥ इदंनीरमिदंक्षीरमत्रस्नाहिइदंपिब ॥ ६६ ॥

श्मशानमें अथवा चौराहेमें मट्टीके पात्रमें दूध और जल तीनि दिनलौं देय ॥ ६४ ॥ दूध और जल भरोभयो कच्चो मट्टीको पात्र लेवै तामें सूतसों बँधाई तीनि लकरी धरिकै यह मंत्र पढै ॥ ६५ ॥ श्मशानमें आगिसों जराये गये हौ और बांधवों करिकै त्याग किये गयेहौ यह जल और यह दूध है यहां जलसों स्नान करो और दूधको पीवो ॥ ६६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निहोत्रवाले पुरुषनको चौथे दिन अस्थिसंचय करनो चाहिये और अग्निहोत्ररहित हैं तिनको तीसरे दिन अथवा दूसरे दिन करनो योग्य है विरोधके विना ॥ ६७ ॥ श्मशानभूमिमें जाकै स्नान करिकै शुद्ध होय है ऊनको सूत लपेटिकै पवित्रीको पहिरै ॥ ६८ ॥ ता पीछे पुत्र श्मशानवासिनके " यमाय त्वा " यामंत्रसों मांसबलि देवै और तीनि परिक्रमा करै ॥ ६९ ॥ हे गरुड !

चतुर्थेसञ्चयःकार्यःसाग्निकैश्चनिरग्निकैः ॥ तृतीयेह्निद्वितीयेवाकर्तव्यश्चाविरोधतः ॥ ६७ ॥ गत्वाश्मशानभूमिं चस्नानंकृत्वाशुचिर्भवेत् ॥ ऊर्णासूत्रंवेष्टयित्वापवित्रींपरिधायच ॥ ६८ ॥ दद्याच्छ्मशानवासिभ्यस्ततोमांसबलिंसुतः ॥ यमायत्वेतिमन्त्रेणतिस्रःकुर्यात्परिक्रमाः ॥ ६९ ॥ ततोदुग्धेनचाभ्युक्ष्यचितास्थानंखगेश्वर ॥ जलेनसेचयेत्पश्चादुद्धरेदस्थिवृन्दकम् ॥ ७० ॥ कृत्वापलाशपत्रेषुक्षालयेद्दुग्धवारिभिः ॥ संस्थाप्यमृन्मये पात्रेश्राद्धंकुर्याद्यथाविधि ॥ ७१ ॥ त्रिकोणंस्थण्डिलंकृत्वागोमयेनोपलेपितम् ॥ दक्षिणाभिमुखोदिक्षु दद्यात्पिण्डत्रयंत्रिषु ॥ ७२ ॥

ता पीछे चिताके स्थानको दूधसे छिरकि पीछे जलसे छिरकि अस्थि संचय करै ॥ ७० ॥ उन अस्थिनको ढाकके पत्तेमें धरिकै दूधसों धोवै फिरि जलसों धोवै फिर मट्टीके पात्रमें रखकै विधिसों श्राद्ध करै ॥ ७१ ॥ तिकोना स्थंडिल करिकै गोबरसों लीपै फिरि दक्षिणाभिमुख हो तीन दिशानमें तीनि पिंड देवै ॥ ७२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चिताकी भस्मको इकट्ठे करिकै वहां त्रिपादुका करिकै वहां खुलोभयो घट जल भरिकै स्थापित करै ॥ ७३ ॥ ता पीछे तंडुलनको पाक करि दही और घी करिकै युक्त विधिपूर्वक जलसमेत मीठी बलि प्रेतके लिये देय ॥७४॥ और दश पांच पैंड उत्तरदिशाको चलै और वहां हे गरुड ! गढिछा खोदि हड्डीनके पात्रको स्थापित करै ॥ ७५ ॥ ताके ऊपर दाहकी पीडाके नाश करनहारे पिंडको

पुञ्जीकृत्यचिताभस्मतत्रधृत्वात्रिपादुकाम् ॥ स्थापयेत्तत्रसजलमनाच्छाद्यमुखघटम् ॥ ७३ ॥ ततस्त
ण्डुलपाकेनदधिघृतसमन्वितम् ॥ बलिंप्रेतायसजलंदद्यान्मिष्टंयथाविधि ॥७४ ॥ पदानिदशपञ्चैवचोत्तरस्यां
दिशिव्रजेत् ॥ गर्तंविधायतत्रास्थिपात्रंसंस्थापयेत्खग ॥ ७५ ॥ तस्योपरिततोदद्यात्पिंडंदाहार्तिनाशकम् ॥
गर्तादुद्धृत्यतत्पात्रंनीत्वागच्छेज्जलाशयम् ॥ ७६ ॥ तत्रप्रक्षालयेद्दुग्धजलादस्थि पुनः पुनः ॥ चर्चयेच्चन्दने
नाथकुङ्कुमेनविशेषतः ॥ ७७ ॥ धृत्वासम्पुटकेतानिकृत्वाचहृदिमस्तके ॥ परिक्रम्यनमस्कृत्यगङ्गामध्येवि
निक्षिपेत् ॥ ७८ ॥ अन्तर्दशाहंयस्यास्थिगङ्गातोयेनिमज्जति ॥ नतस्यपुनरावृत्तिर्ब्रह्मलोकात्कदाचन ॥७९॥

देय गढिछेते वा पात्रको निकारि जलाशय जो नदी तालाव आदि हैं तिनपर जाय ॥७६॥ वहां दूध और जलसों वारंवार हड्डीनको धोवै फिरि उनको चंदनसों चर्चै और विशेषकरि कुंकुमसों ॥७७॥ उनको संपुटमें धरिकै हृदय और मस्तकमें लगावै फिरि परिक्रमा और नमस्कारको करि गंगाके मध्यमें डारि देय ॥७८॥ दशदिनके भीतर जाकी हड्डी गंगाके जलमें डूबै है वाकी ब्रह्मलोकतें कबहूं पुनरावृत्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कहिये फिर लौटनो नहीं होयहै॥७९॥ जितने वर्षनलौं मनुष्यकी हड्डी गंगाजलमें स्थित रहैहैं उतनेही हजार वर्षलौं स्वर्गलोकमें आनंद करे है ॥ ८० ॥ गंगाजलकी लहरोंको छूकै पवन जब मृतकको छुवै है तौ वाको पाप शीघ्रही नाशको प्राप्त होय है ॥ ८१ ॥ भगीरथ उग्रतपसों आराधन करि अपने पुरिखनके उद्धारके लिये गंगादेवीको ब्रह्मलोकते लाये ॥ ८२ ॥ गंगाको पवित्रकरनहारो यश

यावदस्थिमनुष्यस्यगङ्गातोयेषुतिष्ठति ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ ८० ॥ गङ्गाजलोर्मिसंस्पृश्यमृतकंपवनोयदा ॥ स्पृशतेपातकंतस्यसद्यएवविनश्यति ॥ ८१ ॥ आराध्यतपसोग्रेणगङ्गादेवींभगीरथः ॥ उद्धारार्थंपूर्वजानामानयेद्ब्रह्मलोकतः ॥ ८२ ॥ त्रिषुलोकेषुविख्यातगंगायाः पावनंयशः ॥ यापुत्रान्सगरस्यैतान्भस्माख्याननयद्दिवम् ॥८३॥ पूर्वेवयसिपापानियेकृत्वामानवामृताः॥ गङ्गायामस्थिपतनात्स्वर्गलोकंप्रयान्तिते ॥८४॥ कश्चिद्व्याधोमहारण्येसर्वप्राणिविहिंसकः ॥ सिंहेननिहतोयावत्प्रयातिनरकालये ॥८५॥

तीनोंलोकनमें प्रसिद्ध है जो गंगा भस्मही है नाम जिनको ऐसे ६० हजार सगरके पुत्रनको स्वर्गमें पहुँचावत भई ॥ ८३ ॥ जे मनुष्य पहली अवस्थामें पापकरिकै मरिगये है वे गंगामें हड्डी गिरनेसों स्वर्गलोकको जांय हैं ॥ ८४ ॥ बडे वनमें सब प्राणीनको मारनहारो व्याध सिंह करि मारोगयो जबतांई नरकको जाय ॥ ८५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उतनेही कालमें वाकी हड्डी गंगामें गिरी तब वह दिव्य विमानपर चढके देवमंदिरको गयो ॥ ८६ ॥ गंगाही मुक्तिकी देनहारीहै याही कारणसों हड्डीनको सत्पुत्र गंगामें आप डारै और अस्थिसंचयनके पीछे दश गात्र करै ॥ ८७ ॥ कोई पुरुष विदेशमें वनमें अथवा चोरोंके भयसों मरिगयो होय और वाकी देह न मिलीहोय तौ जा दिन वाके मरनेको वृत्तांत सुनै वाही दिन ॥८८॥ दर्भनको पुत्तला

तावत्कालेनतस्यास्थिगङ्गायांपतितंतदा ॥ दिव्यंविमानमारुह्यसगतोदेवमन्दिरम् ॥ ८६ ॥ अतःस्वमेव सत्पुत्रोगङ्गायामस्थिपातयेत ॥ अस्थिसञ्चयनादूर्ध्वंदशगात्रंसमाचरेत् ॥ ८७ ॥ अथकश्चिद्विदेशेवावनेचो रभयेमृतः ॥ नलब्धस्तस्यदेहश्चेच्छृणुयाद्यद्दिनेतदा ॥ ८८ ॥ दर्भपुत्तलकंकृत्वापूर्ववत्केवलंदहेत ॥ तस्य भस्मसमादायगंगातोयेविनिक्षिपेत् ॥८९॥ दशगात्रादिकंकर्मतद्दिनादेवकारयेत् ॥ सएवदिवसोग्राह्यःश्राद्धेसां वत्सरादिके ॥ ९० ॥ पूर्णगर्भेमृतानारीविदार्यजठरंतदा ॥ बालंनिष्कास्यनिक्षिप्यभूमौतामेवदाहयेत् ॥९१॥

बनाय पहलेकी भाँति अकेलेहीको दाह करै वाकी भस्मको लेके गंगाके जलमें डारिदेय ॥ ८९ ॥ और वाही दिनतें दशगात्र विधान आदि करै और सांवत्सर श्राद्ध आदिमें वही दिन लेनो चाहिये ॥९०॥ जो गर्भ पूरा होनेपै नारी मरजाय तौ पेटको चीरि बालकको निकारिकै भूमिमें गाडदेय और वाहीको दाह करै ॥ ९१ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गंगाके तीरमें जो बालक मरै ताको गंगाहीमें डारिदेय अन्यदेशमें सत्ताइस महीनेतकके बालकको भूमिमें गाडै ॥९२॥ यासत्ताईसमहीनेसों अधिक अवस्थाके बालकको दाह करै और वाकी हड्डी गंगामें पहुँचावै जलको घट और बालकको भोजन देनो चाहिये ॥ ९३ ॥ गर्भके नष्ट होनेपै क्रिया नहीं है और बालकके मरनेपै दूध देनो चाहिये घट और भोजनको खीर बालकके मरनेमें देनी चाहिये॥९४॥

गङ्गातीरेमृतंबालंगंगायामेवपातयेत॥अन्यदेशेक्षिपेद्भूमौसप्तविंशतिमासजम्॥९२॥ अतःपरंदहेत्तस्यगङ्गाया मस्थिनिक्षिपेत् ॥ जलकुम्भश्चदातव्यंबालानामेवभोजनम् ॥९३॥ गर्भेनष्टेक्रियानास्तिदुग्धंदेयंमृतेशिशौ ॥ घटंचपायसंभोज्यंदद्याद्बालविपत्तिषु ॥ ९४ ॥ कुमारेचमृतेबालान्कुमारानेवभोयेत ॥ सबालान्भोजयेद्वि प्रान्पौगण्डेसव्रतेमृते ॥ ९५ ॥ मृतश्चपञ्चमादूर्ध्वमव्रतः सव्रतोपिवा ॥ पायसेनगुडेनापिपिंडान्दद्याद्दशक्रमा त् ॥ ९६ ॥ एकादशंद्वादशंचवृषोत्सर्गविधिंविना ॥ महादानविहीनंचपौगण्डकृत्यमाचरेत् ॥ ९७ ॥

कुमारबालकके मरनेपै कुमारनकोही जिमावै और जो व्रतसमेत पौगंड मरे तौ बालकसमेत ब्राह्मणनको भोजन करावै ॥ ९५ ॥ पांचवें वर्षके उपरांत यज्ञोपवीत समेत अथवा बिना यज्ञोपवीतके मरे तौ वाको खीरसों वा गुड़सों क्रमसों दश पिंड देय॥९६॥ एकाद शाह और द्वादशाह करै और वृषोत्सर्गविधि न करै और महादान जे शय्यादान आदि हैं तिनके विना पौगंड अवस्थामें करै ॥९७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पिकेत जीवते भये पौगण्ड अवस्थावालेको सपिंडक नहीं होय है याते वाको बारह दिनलों एकोद्दिष्ट श्राद्ध करै ॥ ९८ ॥ स्त्री और शूद्रनको यज्ञोपवीतके स्थानमें विवाह कहागया है व्रत जो यज्ञोपवीत है ताते पहले अवस्थाके तुल्य क्रिया होय है ॥ ९९ ॥ स्वल्प कहिये थोंडेकर्मके प्रसंगते और स्वल्पही विषयके बंधनसे और स्वल्पही अवस्थामें और देहकेहू स्वल्प होनेपै क्रियाकी

जीवमानेचपितरिनपौगण्डेसपिण्डनम् ॥ अतस्तस्यद्वादशाहन्येकोद्दिष्टंसमाचरेत् ॥ ९८ ॥ स्त्रीशूद्राणां विवाहस्तुव्रतस्थानेप्रकीर्तितः ॥ व्रतात्प्राक्सर्ववर्णानांवयस्तुल्याक्रियाभवेत् ॥ ९९ ॥ स्वल्पात्कर्मप्रसङ्गाच्च स्वल्पाद्विषयबंधनात् ॥ स्ल्पेवयसिदेहेचक्रियांस्वल्पामपीच्छति ॥ १०० ॥ किशोरेतरुणेकुर्याच्छय्या वृषमस्वादिकम् ॥ पदद्दानंमहादानगोदानमपिदापयेत् ॥ १०१ ॥ यतीनांचैवसर्वेषांनदाहोनोदकक्रिया ॥ दशगात्रादिकंतेषांनकर्त्तव्यसुतादिभिः ॥ १०२ ॥ दण्डग्रहणमात्रेणनरोनारायणोभवेत् ॥ त्रिदण्डग्रहणात्तेषांप्रेतत्वंनैवजायते ॥ १०३ ॥

स्वल्पही इच्छा करै है ॥ १०० ॥ किशोर अवस्था तथा तरुण अवस्थामें शय्या और वृषोत्सर्ग आदि करै पददान महादान और गोदानहू करावै ॥ १०१ ॥ सब यतीनको तौ दाह है और न उदकक्रिया है और सुत आदिनकरिकै उनके दशगात्र आदि न करने चाहिये ॥ १०२ ॥ दण्डके ग्रहण मात्रहीसों नरनारायणको रूप होजायहै और त्रिदण्डके ग्रहणसों उनको प्रेतत्व नहींहोयहै॥ १०३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञानी स्वरूपके अनुभवसों सदा मुक्त होयहैं याहीते वे दियेभये पिंडनकी चाहना नहीं राखैं हैं ॥१०४॥ तातें उनके पिंडदान आदि और जलदान आदि न करैं किंतु पिताकी भक्तिसों तीर्थश्राद्ध और गयाश्राद्ध करैं ॥ १०५ ॥ हंस परमहंस कुटीचक बहूदक इस संन्यासीनको हे गरुड ! मरनेपै भूमिमें स्थापित करै ॥ १०६ ॥ गंगा आदि नदियोंके न होनेपै पृथिवीमें स्थापन कहो है और जहां

ज्ञानिनस्तुसदामुक्ताः स्वरूपानुभवेनहि ॥ अतस्तेतुप्रदत्तानांपिंडानांनैवकांक्षिणः ॥ १०४ ॥ तस्मात्पिण्डादिकंतेषांनतुनोदकमाचरेत् ॥ तीर्थश्राद्धंगयाश्राद्धंपितृभक्त्यासमाचरेत् ॥ १०५ ॥ हंसंपरमहंसंचकुटीचकबहूदकौ ॥ एतान्संन्यासिनस्तार्क्ष्यपृथिव्यांस्थापयेन्मृतान् ॥ १०६ ॥ गङ्गादीनामभावेहिपृथिव्यांस्थापनंस्मृतम् ॥ यत्रसन्तिमहानद्यस्तदातास्वेवनिक्षिपेत् ॥ १०७ ॥ इति श्रीगरुडपुराणेदाहास्थिसंचयकर्मनिरूपणोनामदशमोऽध्यायः ॥ १० ॥ गरुडउवाच ॥ दशगात्रविधिंब्रूहिकृतेकिंसुकृतंभवेत् ॥ पुत्राभावेतुकःकुर्यादितिमेवदकेशव ॥ १ ॥

महानदी हैं वहां उन्हींमें प्रवाह करदेय ॥ १०७ ॥ इति श्रीमत्पण्डितपरमसुखतनयपण्डितकेशवप्रसादशर्म्मद्विवेदिकृतायांगरुडपुराणसारोद्धारभाषाटीकायां दशमोऽध्यायः ॥ १० ॥ गरुड बोले; दशगात्रकी विधि कहौ वाके करनेसों कहा सुकृत होय है और पुत्रके न होनेपै कौन करै, हे केशव ! यह मोते कहौ ॥ १ ॥

९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीभगवान् बोले, हे गरुड ! सुनो मैं तुमसों दशगात्रकी विधि कहौंगो जाको करिकै सत्पुत्र पिताके ऋणतें छूटि जाय है ॥ २ ॥ पुत्र शोकको छोडि सतोगुणी धैर्यको धरिकै पिताके पिंड आदि करै आंसूनको न गिरावै ॥ ३ ॥ बांधवोंकरिकै त्याग कियोगयो श्लेष्माको आंसूको अवश होके प्रेत खाय है यातें निरर्थक शोक होनेके कारण रोवनो न चाहिये ॥४॥ जो मनुष्य हजार वर्षलों रातिदिनशोच

श्रीभगवानुवाच ॥ शृणुतार्क्ष्यप्रवक्ष्यामिदशगात्रविधिंतव ॥ यद्विधायचसत्पुत्रोमुच्यतेपैतृकादृणात् ॥ २ ॥ पुत्रःशोकंपरित्यज्यधृतिमास्थायसात्विकीम् ॥ पितुःपिण्डादिकंकुर्यादश्रुपातंनकारयेत् ॥ ३ ॥ श्लेष्माश्रु बान्धवैर्मुक्तंप्रेतोभुंक्तेयतोऽवशः ॥ अतोनरोदितव्यंहितदाशोकान्निरर्थकात् ॥ ४ ॥ यदिवर्षसहस्राणिशोचतेह र्निशंनरः ॥ तथापिनैवनिधनंगतोदृश्येतकर्हिचित् ॥ ५ ॥ जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच ॥ तस्माद परिहार्यार्थेनशोकंकारयेद्बुधः ॥ ६ ॥ नहिकश्चिदुपायोस्तिदैवोवामानुषोपिवा ॥ योहिमृत्युवशंप्राप्तो जन्तुः पुनरिहाव्रजेत् ॥ ७ ॥

करै ताहू मरोभयो कबहू नहीं दिखाई देयगो॥ ५ ॥उत्पन्न भयेको निश्चय मौतहै और मरेभयेको निश्चय जन्म है तातें नहीं निवारण करने योग्य अर्थमें पंडित शोकको न करै ॥ ६ ॥दैवी अथवा मानुषी ऐसो कोई उपाय नहीं है जाते मरो भयो जीव फिरि यहां आ ॥७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अवश्य होनेवाले भावनको जो कुछ उपाय होतो तौ नलराजा रामचंद्र और युधिष्ठिर दुःखकरि युक्त न होते ॥ ८ ॥ स्वप्नके शरीर हूसा काहूको काहूके साथ यह अत्यंत सहवास नहीं होय है और पृथक् जननको कहा कहनो है॥९॥जैसे कोई बटोही छायाको सहारा लेकै विश्राम करै है और विश्राम लेकै फिरि चलदेय है ऐसेही प्राणीनको समागम है ॥१०॥प्रातःकाल जो भोजनयोग्य वस्तु बनाई

अवश्यंभाविभावानांप्रतीकारोभवेद्यदि ॥ तदादुःखैर्नयुज्येरन्नलरामयुधिष्ठिराः ॥ ८ ॥ नायमत्यन्तसंवासः कस्यचित्केनचित्सह ॥ अपिस्वप्नशरीरेणकिमुतान्यैः पृथग्जनैः ॥ ९ ॥ यथाहि पथिकः कश्चिच्छायामाश्रित्यविश्रमेत ॥ विश्रम्यचपुनर्गच्छेत्तद्वद्भूतसमागमः ॥ १० ॥ यत्प्रातः संस्कृतं भोज्यं सायंतच्चविनश्यति ॥ तदन्नरससंपुष्टेकायेकानामनित्यता ॥११॥ भैषज्यमेतद्दुःखस्यविचारंपरिचिन्त्यच ॥ अज्ञानप्रभवंशोकंत्यक्त्वाकुर्यात्क्रियांसुतः॥१२॥पुत्राभावेवधूःकुर्याद्भार्याभावेचसोदरः॥शिष्योवाब्राह्मणस्यैवसपिंडोवासमाचरेत् ॥१३॥

जाय है और सायंकालमें जो नष्ट होजायहै वा अन्नके रससों पालेभये शरीरमें कौनसी नित्यताहै अर्थात और कोई नहीं ॥११॥विचारको या दुःखकी औषध चिन्तवन करिकै अज्ञानतें उत्पन्न भये शोकको छोडिकै पुत्र क्रिया करै॥१२॥पुत्रके न होनेपै वधू करै वाकेहु न होनेपै सगा भाई करै अथवा ब्राह्मणकी क्रिया शिष्य करै अथवा सपिण्ड करै ॥ १३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हे गरुड ! मनुष्यके पुत्रहीन होनेपै जेठे भाई अथवा छोटे भाईके पुत्र पौत्र दशगात्र आदि करै ॥ १४ ॥ एक पितातें उत्पन्न भये भाईनमें जो एक पुत्रवान् होय तौ वाही पुत्रसों सब पुत्रवाले हैं यह मनुने कहाहै॥ १५॥ एकके जो बहुतसी पत्नी होयँ और उनमेंसों एकके पुत्र होय तो वा एक पुत्रसों सब पुत्रवती होयँ हैं॥ १६ ॥ सब पुत्रहीननको मित्र पिण्डदान करै क्रियाको लोप

ज्येष्ठस्यवाकनिष्ठस्यभ्रातुः पुत्रैश्चपौत्रकैः ॥ दशगात्रादिककार्यंपुत्रहीनेनरेखग ॥ १४ ॥ भ्रातॄणामेकजाता नामेकश्चेत्पुत्रवान्भवेत् ॥ सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीत् ॥ १५ ॥ पत्न्यश्चबह्व्यएकस्यचैकापुत्रवती भवेत् ॥ सर्वास्ताः पुत्रवत्यःस्युस्तेनैकेनसुतेनहि ॥१६॥ सर्वेषांपुत्रहीनानांमित्रः पिण्डंप्रदापयेत ॥ क्रियालो पोनकर्तव्यः सर्वाभावेपुरोहितः ॥ १७ ॥ स्त्रीवाथपुरुषः कश्चिदिष्टस्यकुरुतेक्रियाम् ॥ अनाथप्रेतसंस्कारात्को टियज्ञफलंलभेत् ॥ १८ पितुःपुत्रेणकर्तव्यंदशगात्रादिकंखग ॥ मृतेज्येष्ठप्यतिस्नेहान्नकुर्वीतपितासुते ॥१९॥

न करनो चाहिये मित्रहू न होय तौ पुरोहित पिण्डदान करै ॥ १७ ॥ कोई स्त्री कोई पुरुष जो इष्टकी क्रियाकरै तौ वह अनाथ प्रेतके संस्कारसों कोटि यज्ञनके फलको प्राप्त होय ॥ १८ ॥ हे गरुड ! पुत्रकरि पिताके दशगात्रआदि करने चाहिये ज्येष्ठपुत्रके मरनेपै अतिस्नेहसों पिता न करे ॥ १९ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जो बहुतसे पुत्र होंय तौ विधि एक पुत्र करै अर्थात् दशगात्र सपिंडी तथा और सोलह श्राद्ध इन सबनको एकही करै॥ २० ॥धनके विभाग होजानेपरहू एकहीको करने चाहिये और जिनमें विभाग होगयो है उनको संवत्सर श्राद्ध आदि पृथक् करने चाहिये ॥२१॥ तातें ज्येष्ठपुत्र भक्तिसों दशगात्र करै इन गात्रनके करनेमें एकवार भोजन करै भूमिमें सोवे और सदा शुद्ध तथा ब्रह्मके ध्यानमें तत्पर

बहवोपियदापुत्राविधिमेकः समाचरेत्॥ दशगात्रंसपिंडत्वंश्राद्धान्यन्यानिषोडश ॥२०॥ एकेनैवतुकार्याणिस विभक्तधनेष्वपि ॥ विभक्तैस्तुपृथक्कार्यंश्राद्धंसांवत्सरादिकम् ॥ २१ ॥ तस्माज्ज्येष्ठःसुतोभक्त्यादशगात्रंस माचरेत ॥ एकभोजीभूमिशायीभूत्वाब्रह्मपरः शुचिः ॥२२॥ सप्तवारंपरिक्रम्यधरणींयत्फलंलभेत् ॥ क्रियां कृत्वापितुर्मातुस्तत्फलंलभतेसुतः ॥ २३ ॥ आरभ्यदशगात्रंचयावद्वैवार्षिकंभवेत् ॥ तावत्पुत्रः क्रियांकुर्वन् गयाश्राद्धफलंलभेत् ॥२४॥ कूपेतडागेवारामेतीर्थेदेवालयेपिवा॥गत्वामध्यमयामेतुस्नानंकुर्यादमन्त्रकम्॥२५॥

रहै ॥ २२ ॥ सातवार पृथवीकी परिक्रमा करनेसों जा फलको प्राप्त होय है वा फलको माता पिताकी क्रियाको करिकै पुत्र प्राप्त होय है ॥ २३ ॥ दशगात्रनको आरंभ करि जबलौं बरसी होय तबलौं पुत्र क्रियाको करतो भयो गया श्राद्धके फलको प्राप्त होय है ॥ २४ ॥कुएँमें तालाबमें अथवा बगीचेमें तीर्थ और देवालयमें जायके मध्यम पहरमें विना मंत्र स्नान करै ॥२५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुद्ध हो वृक्षके मूलमें दक्षिणाभिमुख स्थित होय वहां वेदिका बनावै और गोबरसों लीपै ॥ २६ ॥ वामें पत्तेपर कुशाके विश्वामित्रको स्थापित करै वसुनकी पाद्य आदिसों पूजाकरि 'अतसीपुष्पसंकाशम्' इत्यादि मंत्रको पढकै प्रणाम करै ॥ २७ ॥ तापीछे उनके आगे पिंडके लिये कुशको आसन डारै ताके ऊपर नाम गोत्रको उच्चारण करि पिंडको धरै ॥२८॥ चावलोंके पाकसों अथवा जवके

शुचिर्भूत्वावृक्षमूलेदक्षिणाभिमुखः स्थितः ॥ कुर्याच्चवेदिकांतत्रगोमयेनोपलिप्यताम् ॥ २६ ॥ तस्यांपर्णेदर्भमयंस्थापयेत्कौशिकंद्विजम् ॥ तंपाद्यादिभिरभ्यर्च्यप्रणमेदतसीतिच ॥ २७ ॥ तदग्रेचततोदत्त्वापिण्डार्थंकौशमासनम् ॥ तस्योपरिततः पिण्डनामगोत्रोपकल्पितम् ॥ २८ ॥ दद्यात्तण्डुलपाकेनयवपिष्टेनवासुतः ॥ उशीरंचन्दनंभृंगराजपुष्पंनिवेदयत् ॥ धूपदीपंनैवेद्यंमुखवासंचदक्षिणाम् ॥ २९ ॥ काकान्नंपयसोःपात्रवर्धमानजलांजलीन् ॥ प्रेतायामुकनाम्नेचमद्दत्तमुपतिष्ठतु ॥ ३० ॥

चूनसों पुत्र वा पिंडको बनावै तापीछे उशीर चंदन और भांगरेके फूल वाके ऊपर चढावै फिरि धूप दीप नैवेद्य मुखवास और दक्षिणा वाके आगे धरै ॥ २९ ॥ दूध-और पानीके पात्रमें काकके लिये अन्न धरै और वर्द्धमान जलकी अंजली देय और कहै कि अमुकनाम्ने प्रेताय मद्दत्तम् उपतिष्ठतु" अर्थात् अमुकनामप्रेतके लिये मेरो दियोभयो प्राप्त हो ॥ ३० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्न वस्त्र और जल अथवा अन्य वस्तु जो प्रेत शब्दसों दीजाय है व मृतकको आनंद फल देनहारो होय है ॥३१॥ तातें आदिके दिनसों लगाकै सपिंडी विधानतें पहले स्त्रीको और पुरुषको प्रेतशब्दको उच्चारण करै ॥ ३२ ॥ पहले दिन पिंड विधिपूर्वक दियोजाय वाही विधिसों अन्नकरि नव पिंडनको देय ॥ ३३ ॥ नवमें दिन सब सपिंडलोग मृतकके स्वर्गकी कामना करकै तैलाभ्यंग करैं अर्थात् सब

अन्नंवस्त्रंजलंद्रव्यमन्यद्वादीयतेचयत् ॥ प्रेतशब्देनयद्दत्तंमृतस्यानन्त्यदायकम् ॥ ३१ ॥ तस्मादादिदिना द्रूध्वंप्राक्सपिण्डीविधानतः ॥ योषितःपुरुषस्यापिप्रेतशब्दंसमुच्चरेत् ॥ ३२ ॥ प्रथमेहनियत्पिण्डोदीयतेवि धिपूर्वकम् ॥ तेनैवविधिनान्नेननवपिण्डान्प्रदापयेत ॥ ३३ ॥ नवमेदिवसेचैवसपिण्डःसकलैर्जनैः ॥ तैलाभ्य ङ्गःप्रकर्तव्योमृतकस्वर्गकाम्यया ॥ ३४ ॥ बहिःस्नात्वागृहीत्वाचदूर्वालाजसमन्विताः ॥ अग्रतःप्रमदांकृत्वा समागच्छेन्मृतालयम ॥ ३५ ॥ दूर्वावत्कुलवृद्धिस्तेलाजाइवविकासता ॥ एवमुक्तात्यजेद्गेहेलाजान्दूर्वासम न्वितान् ॥ ३६ ॥ दशमेहनिमांसेनपिण्डंदद्यात्खगेश्वर ॥ माषेणतन्निषेधाद्वाकलौनपलपैतृकम् ॥ ३७ ॥

तेल लगावैं॥ ३४ ॥ बाहर न्हायकै खीलन समेत दूबको ले आगे स्त्रीको करिकै मृतकके घरमें जाय ॥३५॥ दूबके समान तेरे कुलकी वृद्धि होय और खीलनके समान तेरे विकास होय ऐसे कहिकै वाके घरमें दूबसमेत खीलैं डारि देय ॥३६॥ हे गरुड ! दशमें दिन मांसके पिंड देय वा मांसको कलियुगमें निषेध है तौ उरदके देवै कारण यह है कि कलियुगमें पितरनको मांसके पिंड नहीं दिये जायहैं ॥३७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दशवें दिन सब बांधव मुंडन करावें और क्रिया करनहारो पुत्रकोहू फिरि मुडन करावै ॥ ३८ ॥ दश दिनलौं एक ब्राह्मणको मिष्टान्न भोजन करावै और हाथ जोरि हरिको ध्यान करि प्रेतके मुक्तिकी प्रार्थना करै ॥ ३९ ॥अलसीके फूलके समान है कांति जिनकी और पीले जिनके वस्त्र और अच्युत कहिये अविनाशी जो विष्णु भगवान् गोविंद हैं तिनको जे नमस्कार करै हैं तिनको भय नहीं है॥४०॥

दशमेदिवसेक्षौरंबान्धवानांचमुण्डनम् ॥ क्रियाकर्तुःसुतस्यापिपुनर्मुण्डनमाचरेत ॥ ३८ ॥ मिष्टान्नभोंजयेदेकंदिनेषुदशसुद्विजम् ॥ प्रार्थयेत्प्रेतमुक्तिंचहरिंध्यात्वाकृताञ्जलिः ॥ ३९ ॥ अतसीपुष्पसंकाशंपीतवाससमच्युतम् ॥ येनमस्यन्तिगोविन्दंनतेषांविद्यतेभयम् ॥ ४० ॥ अनादिनिधनोदेवःशंखचक्रगदाधरः ॥ अक्षय्यःपुण्डरीकाक्षःप्रेतमोक्षप्रदोभव ॥ ४१ ॥ इतिसंप्रार्थनामन्त्रंश्राद्धान्तेप्रत्यहंपठेत ॥ स्नात्वागत्वागृहेदत्त्वागोग्रासंभोजनंचरेत् ॥ ४२ ॥ इति श्रीगरुडपुराणेसारोद्धारेदशगात्रविधिनिरूपणनामैकादशोऽध्यायः ॥ ११ ॥

नहीं हैं आदि और अंत जिनको और शंख चक्र तथा गदाको धारण किये भये ऐसे अक्षय्य पुण्डरीकाक्ष देव विष्णु तुम प्रेतको मुक्ति देनहारे होउ॥४१॥या प्रार्थनाके मंत्रको श्राद्धके अंतमें प्रतिदिन पढै न्हायके घरमें जायकै और गोग्रास देकै आप भोजन करै ॥४२॥

इति श्रीमत्पंडितपरमसुखतनयपण्डितकेशवप्रसादशर्म्मद्विवेदिकृतायां गरुडपुराणसारोद्धारभाषाटीकायामेकादशोऽध्यायः ॥ ११ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गरुड बोले ॥ हे सुरेश्वर ! एकादश दिनकीहू विधि कहो हे जगदीश्वर ! वृषोत्सर्ग विधानहूको मोतें कहौ ॥ १ ॥ श्रीभगवान् बोले ग्यारहें दिन प्रातःकालही जलाशयपर जानो चाहिंये और सब और्ध्वदेहिक प्रयत्नसों करनो चाहिये ॥ २ ॥ और वेदशास्त्रमें परायण ब्राह्मणको निमंत्रण करै हाथ जोरि नमस्कार करिकै प्रेतकी मुक्तिकी चाहना करै ॥३॥ स्नान संध्या आदि करिकै आचार्यहू शुद्ध होय और

॥ गरुडउवाच ॥ एकादशदिनस्यापिविधिंब्रूहिसुरेश्वर ॥ वृषोत्सर्गविधानंचवदमजगदीश्वर ॥ १ ॥ श्रीभगवानुवाच ॥ एकादशेऽह्निगन्तव्यंप्रातरेवजलाशये ॥ और्ध्वदेहिक्रियासर्वाकरणीयाप्रयत्नतः ॥ २ ॥ निमन्त्रयेद्ब्राह्मणांश्चवेदशास्त्रपरायणान् ॥ प्रार्थयेत्प्रेतमुक्तिंचनमस्कृत्यकृताञ्जलिः ॥ ३ ॥ स्नानसंध्यादिकंकृत्वाह्याचार्योऽपिशुचिर्भवेत् ॥विधानंविधिवत्कुर्यादेकादशदिनोचितम् ॥४॥ अमन्त्रंकारयेच्छ्राद्धंदशाहंनामगोत्रतः॥ एकादशेह्निप्रेतस्यदद्यात्पिण्डंसमन्त्रकम् ॥ ५ ॥ सौवर्णंकारयेद्विष्णुंब्रह्माणंरौप्यकंतथा ॥ रुद्रस्ताम्रमयःकार्योयमोलोहमयःखग ॥ ६ ॥

एकादश दिनका जो विधान है ताकों विधिवत्त करै॥४॥और विना मंत्रके नामगोत्रको उच्चारण करि दशदिन श्राद्ध करै और ग्यारहें दिन प्रेतको पिंडदान करै ॥५॥ सुवर्णकी विष्णुकी मूर्ति बनावै और ब्रह्माकी रूपेकी बनावै और रुद्रकी मूर्ति तांबेकी बनावै और हे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गरुड ! यमकी मूर्ति लोहेकी बनावे ॥ ६ ॥ पश्चिमदिशामें गंगाजलसमेत विष्णुको कलश धरै ताके ऊपर पीले कपडेमें लपेटिकै विष्णुमूर्ति स्थापित करै॥७॥और पूर्वदिशामें दूध और जलसमेत ब्रह्माको कलश धरै वापै सफेद कपरा लपेटि ब्रह्माकी मूर्ति स्थापित करै॥८॥ और उत्तरमें सहत और घीसों भरेभये रुद्रके कलशको धरै ताके ऊपर लालवस्त्रसों लपेटि श्रीरुद्रको स्थापित करै ॥ ९ ॥

पश्चिमेविष्णुकलशंगङ्गोदकसमन्वितम् ॥ तस्योपरिन्यसेद्विष्णुंपीतवस्त्रेणवेष्टितम् ॥७॥ पूर्वेतुब्रह्मकलशंक्षीरोदकसमन्वितम्॥ब्रह्माणंस्थापयेत्तत्रश्वेतवस्त्रेणवेष्टितम् ॥८॥ उत्तरस्यांरुद्रकुम्भमपूरितमधुसर्पिषा ॥ श्रीरुद्रंस्थापयेत्तत्ररक्तवस्त्रेणवेष्टितम् ॥९॥ दक्षिणस्यांयमघटमिन्द्रोदकसमन्वितम् ॥ कृष्णवस्त्रेणसंवेष्ट्यतस्योपरियमंन्यसेत ॥ १० ॥ मध्येतुमण्डलंकृत्वास्थापयेत्कौशिकंसुतः ॥ दक्षिणाभिमुखोभूत्वाऽपसव्येनचतर्पयेत् ॥ ११ ॥ विष्णुंविधिंशिवधर्मंवेदमन्त्रैश्चतर्पयेत् ॥ होमंकृत्वाचरेत्पश्चाच्छ्राद्धंदशघटादिकम् ॥ १२ ॥

और दक्षिणदिशामें इंद्रके जलसे भरेभये यमके घटको धरै ताके ऊपर काले कपरासों लपेटि यमकी मूर्ति स्थापित करै ॥ १० ॥ और मध्यमें मंडल करिकै पुत्र कौशिकको स्थापित करै और दक्षिणाभिमुख होकै अपसव्यसों तर्पण करै ॥११॥ विष्णु ब्रह्मा शिव और धर्म इनको वेदके मंत्रसों तर्पण करै और होमकरिकै पीछे दशघट आदि श्राद्ध करै ॥ १२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

फिरि पितरनके तारनेको गोदान दे हे माधव ! मोकरिकै दिईभई यह गौ तुम्हारी प्रसन्नताके लिये होय ॥ १३ ॥ और वा मृतकके भोगे भये जे वस्त्र भूषण तथा वाहन होंय उनको और घीसों भरोभयो कांसेको पात्र और सतनजा तथा वाकी प्यारी वस्तु ॥ १४ ॥ और तिल आदि आठ महादान और जो अंतकालमें कियोगयो होय इन सबको शय्याके समीप धरिकै दान करै ॥ १५ ॥ ब्राह्मणके चरण

गोदानञ्चततोदद्यात्पितॄणांतारणायवै ॥ गौरेषाहिमयादत्ताप्रीतयेतेऽस्तुमाधव ॥ १३ ॥ उपभुक्तंतुतस्यासीद्व
स्त्रभूषणवाहनम् ॥ घृतपूर्णंकांस्यपात्रंसप्तधान्यंतदीप्सितम् ॥१४॥ तिलाद्यष्टमहादानमन्तकालेनचेत्कृतम्॥
शय्यासमीपेधृत्वैतद्दानंतस्याः प्रदापयेत् ॥ १५ ॥ प्रक्षाल्यविप्रचरणौपूजयेदम्बरादिभिः ॥ सिद्धान्नंतस्यदा
तव्यंमोदकाऽपूपकाः पयः ॥ १६ ॥ स्थापयेत्पुरुषंहैमंशय्योपरितदासुतः ॥पूजयित्वाप्रदातव्यामृतशय्याय
थोदिता ॥ १७ ॥ प्रेतस्यप्रतिमायुक्तासर्वोपकरणैर्वृता ॥ प्रेतशय्यामयाह्येषातुभ्यंविप्रनिवेदिता ॥ १८ ॥

धोयकै वस्त्रआदिसों पूजन करै और लड्डू पुआ आदि सिद्ध अन्न तथा दूध वाको देनो चाहिये ॥१६॥ वा समय पुत्र शय्याके ऊपर सुवर्णके पुरुषको स्थापित करै वाको पूजन करिकै कहेके अनुसार मृतशय्या देनी चाहिये ॥ १७ ॥ हे विप्र ! प्रेतकी प्रतिमा करि युक्त और संपूर्ण सामग्री समेत यह प्रेतशय्या मैंने तुमसों कही ॥ १८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या प्रकार कुटुंबी आचार्यके लिये देनी चाहिये ता पीछे प्रदक्षिणा करिकै नमस्कार करि विसर्जन करै ॥ १९ ॥ या प्रकार शय्याके देनेसों और नवकादि श्राद्धसों और वृषोत्सर्गके विधानसों प्रेत परमगतिको प्राप्त होय है ॥ २० ॥ ग्यारहें दिन विधिसों वृषोत्सर्ग करै हीन अंगवालेको रोगीको बच्चोंको छोडकै सलक्षण अर्थात् चिह्नसमेत करै ॥ २१ ॥ लाल जाकी आंखैं और पिंगल वर्ण और सींग

इत्याचार्यायदातव्याब्राह्मणायकुटुम्बिने ॥ ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् ॥ १९ ॥ एवंशय्याप्रदानेनश्राद्धेननवकादिना ॥ वृषोत्सर्गविधानेनप्रेतोयातिपरांगतिम् ॥ २० ॥ एकादशेह्निविधिनावृषोत्सर्गंसमाचरेत् ॥ हीनाङ्गंरोगिणंबालंत्यक्त्वाकुर्यात्सलक्षणम् ॥ २१ ॥ रक्ताक्षःपिंगलोयस्तुरक्तःशृङ्गेगलेखुरे॥श्वेतोदरःकृष्णपृष्ठोब्राह्मणस्यविधीयते ॥२२॥ सुस्निग्धवर्णोयोरक्तः क्षत्रियस्यविधीयते॥पीतवर्णश्चवैश्यस्यकृष्णःशूद्रस्यशस्यते ॥२३॥ यस्तुसर्वाङ्गपिंगःस्याच्छ्वेतःपुच्छेपदेषुच॥सपिंगोवृषइत्याहुःपितॄणांप्रीतिवर्द्धनः ॥२४ ॥

तथा खुर जाके लाल और पेट सफेद पीठ काली ऐसो वृष ब्राह्मणको कहो है ॥२२॥ अच्छा चिकना लालरंगका क्षत्रियके लिये कहो है और पीले रंगका वैश्यको और शूद्रको काला कहा है ॥ २३ ॥ जाको सब अंग तौ पिंगवर्ण होय और पूंछ तथा पांय सफेद होंय वाको पिंगवृष कहैं हैं वह पितरनकी प्रीतिको बढावनहारो है ॥ २४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जा बैलके पाँव मुख और पूँछसफेद होंय और लाखके रसके समान देहको रंग होय ताको नील कहे हैं ॥२५॥ जो रंगमें लाल होय और जाके मुख तथा पूँछ पांडुवर्ण होय और खुर तथा सींग पिंगलवर्ण होय वाको रक्तनील कहै हैं ॥२६॥ सब अंगमें जो एक रंग होय और खुर तथा पूँछमें पिंगवर्ण होय वाको नीलपिंग कहै हैं वह पुरुषोंको उद्धार करनहारो है ॥२७॥ जाको कबूतरकोसोरंग होय

चरणास्तुमुखंपुच्छंयस्यश्वेतानिगोपतेः ॥ लाक्षारससवर्णोयस्सनीलइतिकीर्तितः ॥ २५ ॥ लोहितोयस्तुवर्णेन मुखेपुच्छेचपाण्डुरः ॥पिंगःखुरविषाणाभ्यांरक्तनीलोनिगद्यते ॥ २६ ॥ सर्वांगेष्वेकवर्णोयः पिंगःपुच्छेखुरेषुयः ॥ तंनीलपिंगमित्याहुः पूर्वजोद्धारकारकम् ॥ २७ ॥ पारावतंसवर्णस्तुललाटेतिलकान्वितः ॥ तबभ्रुनीलमित्याहुःपूर्णंसर्वांगशोभनम् ॥ २८ ॥ नीलःसर्वशरीरेषुरक्तश्चनयनद्वये ॥ तमप्याहुर्महानीलंनीलःपञ्चविधःस्मृतः ॥ ॥ २९ ॥ अवश्यमेवभोक्तव्योनसधार्योगृहेभवेत् ॥ तदर्थमेषाचरतिलोकेगाथापुरातनी ॥ ३० ॥

और माथेमें जाके तिलक होय वाको बभ्रुनील कहै हैं वह पूर्ण है और सब अंगनसों शोभन है ॥२८॥ जाको सब शरीर नीलाहोय और दोनों आँखैं लाल होंय वाको महानील कहै हैं; नील पाँच भाँतिको होय है ॥२९॥ अवश्यही छोडने योग्य होय है वह घरमें राखन योग्य नहीं होय है ताके लिये पुरानी गाथा लोकमें प्रचलित होरही है ॥ ३० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहुतसे पुत्रकी इच्छा करने योग्य है इसलिये कि, उनमेंसों एकहू गयाको जाय गौरी कन्याको ब्याहै अथवा नील बैलको छोडै ॥३१॥
वही पुत्र मानने योग्य है जो वृषोत्सर्ग करै और जो गयाके श्राद्ध करै वह पुत्र है अन्य विष्ठाके समान हैं ॥ ३२ ॥ जे कोई जाके
पुरखें रौरवादि नरकमें पचाये जांय हैं उन सबनको वृषोत्सर्ग करिकै इक्कीस पीढीनको तारदे ॥ ३३ ॥ स्वर्गमें गयेभयेहू पितर

एष्टव्याबहवःपुत्रायद्येकोपिगयांव्रजेत ॥गौरींविवाहयेत्कन्यांनीलंवावृषमुत्सृजेत् ॥ ३१ ॥ सएवपुत्रोमन्तव्यो
वृषोत्सर्गंतुयश्चरेत् ॥ गयायांश्राद्धदाताचयोऽन्योविष्ठासमः किल ॥३२॥ रौरवादिषुयकेचित्पच्यन्तेयस्यपूर्व
जाः ॥ वृषोत्सर्गेणतान्सर्वांस्तारयेदेकविंशतिम् ॥३३॥ वृषोत्सर्गंकिलेच्छन्तिपितरःस्वर्गताअपि ॥ अस्मद्वं
शेसुतःकोपिवृषोत्सर्गंकरिष्यति ॥३४॥ तदुत्सर्गाद्वयंसर्वेयास्यामःपरमांगतिम् ॥ सर्वयज्ञेषुचास्माकंवृषयज्ञोहि
मुक्तिदः ॥ ३५ ॥ तस्मात्पितृविमुक्त्यर्थंवृषयज्ञंसमाचरेत् ॥ यथोक्तेनविधानेनकुर्यात्सर्वंप्रयत्नतः ॥ ३६ ॥

निश्चय वृषोत्सर्गकी इच्छा करै हैं कि, हमारे वंशमें कोई पुरुष वृषोत्सर्ग करैगो ॥ ३४ ॥ वाके उत्सर्गसों हम सब परमगतिको प्राप्त
होयँगे सब यज्ञमें वृषयज्ञ हमको निश्चय मुक्ति देनहारो है ॥ ३५ ॥ तातें पितरनकी मुक्तिके लिये वृषयज्ञको करै यथोक्त विधानसों
सब यत्नपूर्वक करै ॥ ३६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ग्रहनको स्थापन करिकै उनके मंत्रनसों पूजनकरै और शास्त्रके अनुसार होम करै और आतुर वृषको पूजन करै ॥ ३७ ॥ बछरा और बछियाको लायकै उन दोनोंके कंकण बांधै और विवाहके विधानसों तब खंभ गाडै ॥ ३८ ॥ वृषको और बछियाको रुद्र कुंभके जलसों स्नान करावै फिरी गंध और मालासों पूजन करि प्रदक्षिणा करावै ॥ ३९ ॥ दाहिनी ओर त्रिशूल और बांई ओर चक्र लगावै

ग्रहाणांस्थापनंकृत्वातत्तन्मन्त्रैश्चपूजनम् ॥ होमंकुर्याद्यथाशास्त्रंपूजयद्वृषमातुरः ॥ ३७ ॥ वत्संवत्सींसमानाय्यबध्नीयात्कङ्कणंतयोः ॥ वैवाह्येनविधानेनस्तम्भमारोपयेत्तदा ॥ ३८ ॥ स्नापयेच्चवृषंवत्सींरुद्रकुम्भोदकेनच ॥ गन्धमाल्यैश्चसंपूज्यकारयेच्चप्रदक्षिणाम् ॥३९॥ त्रिशूलंदक्षिणेपार्श्वेवामेचक्रंप्रदापयेत् ॥ तंविमुच्याञ्जलिंबद्ध्वापठेन्मन्त्रमिमंसुतः ॥ ४० ॥ धर्मस्त्वंवृषरूपेणब्रह्मणानिर्मितः पुरा ॥ तवोत्सर्गप्रदानेनतारयस्वभवार्णवात् ॥ ४१ ॥इतिमन्त्रान्नमस्कृत्यवत्संवत्सींसमुत्सृजेत ॥ वरदोहंसदातस्यप्रेतमोक्षंददामिच ॥ ४२ ॥ तस्मादेषप्रकर्त्तव्यस्तत्फलंजीवतोभवेत् ॥ अपुत्रस्तुस्वयंकृत्वासुखंयातिपरांगतिम् ॥ ४३ ॥

वाको छोडिकै हाथ जोरि पुत्र यह मंत्र पढै ॥ ४० ॥ तू धर्म है पहले ब्रह्माकरि बैलके रूपमें बनायो गयो है तेरे उत्सर्ग प्रदान करि भवरूपी समुद्रते तार ॥ ४१ ॥ या मंत्रसों नमस्कार करि बछरा और बछियाको छोडदे मैं सदा वाको वर देनहारो हौं प्रेतके मोक्षको देउहौं ॥ ४२ ॥ तातें यह करनो चाहिये कि जीवते भरेहू वाको फल होय है पुत्ररहित पुरुष आपही याविधिको करिकै सुखपूर्वक

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परमगतिको प्राप्त होय है ॥ ४३ ॥ कार्तिक आदि शुभ महीनेमें सूर्यके उत्तरायण होनेपै शुक्लपक्षमें अथवा कृष्णपक्षमें तथा द्वादशी
आदि तिथिमें ॥४४॥ सूर्य चन्द्रके ग्रहणमें पवित्र तीर्थमें दोनों अयननमें और दोनों विषुवत्‌में वृषोत्सर्ग करै ॥४५॥ शुभलग्नमें तथा
शुभमुहूर्तमें शुद्धदेशमें सावधान हो विधिके जाननेवाले शुभलक्षण ब्राह्मणको बुलाय ॥ ४६ ॥ जप होम तथा दाननसों देहको शोधन

कार्तिकादौशुभेमासेचोत्तरायणगेरवौ ॥ शुक्लपक्षेऽथवाकृष्णेद्वादश्यादितिथौतथा ॥ ४४ ॥ ग्रहणद्वितयेचैव
पुण्यतीर्थेऽयनद्वये ॥ विषुवद्वितयेचापिवृषोत्सर्गंसमाचरेत् ॥ ४५ ॥ शुभलग्नेमुहूर्तेचशुचौदेशेसमाहितः ॥
ब्राह्मणंतुसमाहूय विधिज्ञंशुभलक्षणम् ॥ ४६ ॥ जपैर्होमैस्तथादानैःप्रकुर्याद्देहशोधनम् ॥ पूर्ववत्सकलंकृत्यं
कुर्याद्धोमादिलक्षणम् ॥ ६७ ॥ शालग्रामंचसंस्थाप्यवैष्णवंश्राद्धमाचरेत् ॥ आत्मश्राद्धंततः कुर्याद्दद्याद्दानं
द्विजन्मने ॥ ४८ ॥ एवंयः कुरुतेपक्षिन्नपुत्रश्चापिपुत्रवान् ॥ सर्वकामफलंतस्यवृषोत्सर्गात्प्रजायते ॥ ४९ ॥

करै और पहलेकी भाँति होमादिलक्षण सब विधिको करै ॥ ४७ ॥ शालग्रामको स्थापित करि वैष्णव श्राद्ध करै ता पीछे अपनो
श्राद्धकरै और ब्राह्मणके लिये दान देय ॥ ४८ ॥ हे पक्षिन् ! पुत्रवान तथा अपुत्र जो या प्रकार करै है वाको वृषोत्सर्गते
सब कामनाके फल मिलै हैं ॥ ४९ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निहोत्र आदि यज्ञनकरिके और नानाप्रकारके दाननकरिके वा गतिको नहीं पावे है जाको वृषोत्सर्गते प्राप्त होय है ॥ ५० ॥ बालक अवस्थामें कुमार अवस्थामें और पौगंड अवस्थामें यौवनमें तथा बुढापेमें कियोभयो जो पाप वह वृषोत्सर्गते दूरि होजाय है यामें संदेह नहीं है ॥ ५१ ॥ मित्रको द्रोही कृतघ्न जो कियेभये उपकारको न मानै और सुवर्ण चुरावनहारो येसब वृषोत्सर्गते मुक्त होजाय हैं॥५२॥

अग्निहोत्रादिभिर्यज्ञैर्दानैश्चविविधैरपि ॥ नतांगतिमवाप्नोतिवृषोत्सर्गेणयांलभेत् ॥ ५० ॥ बाल्येकौमारेपौगण्डेयौवनेवार्धकेकृतम् ॥ यत्पापंतद्विनश्येतवृषोत्सर्गान्नसंशयः ॥५१॥ मित्रद्रोहीकृतघ्नश्चसुरापोगुरुतल्पगः ॥ ब्रह्महाहेमहारीचवृषोत्सर्गात्प्रमुच्यते ॥ ५२ ॥ तस्मात्सर्वप्रयत्नेनवृषयज्ञंसमाचरेत् ॥ वृषोत्सर्गसमंपुण्यंनास्तितार्क्ष्यजगत्त्रये ॥ ५३ ॥ पतिपुत्रवतीनारीद्वयोरग्रेमृतायदि ॥ वृषोत्सर्गंनैवकुर्याद्दद्याद्गांचपयस्विनीम् ॥ ५४ ॥ वृषभंवाहयेद्यस्तुस्कन्धेपृष्ठेचखेचर ॥ सपतेन्नरकेघोरेयावदाभूतसंप्लवम् ॥ ५५ ॥

तातें सब यत्ननसों वृषोत्सर्ग करै हे गरुड! तीनों लोकनमें वृषोत्सर्गके समान पुण्य नहीं है ॥५३॥ पति पुत्रवाली स्त्री जो दोनोंते पहिले मरिजाय तो वह वृषोत्सर्ग न करै किंतु दूध देती भई गौको दान करै ॥५४॥ हे गरुड! जो बैलको कंधेमें जोते है और जो पीठिपर लादै हैं वह महाप्रलयपर्यंत घोरनरकमें पडो रहै है ॥ ५५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जो निर्दयी घूँसनसों अथवा लाठीनसों बलको मारै है वह मनुष्य कल्पपर्यंत यमकी यातनानको भोगैहै ॥ ५६ ॥ या प्रकार वृषो त्सर्ग करिकै सोलह श्राद्ध करै सपिंडीकरणसों पहले सो मैं तुमसों कही हौं ॥ ५७ ॥ स्थानमें द्वारपर आधे मार्गमें चितापर मृतकके हाथपर अस्थिके संचयमें छठो और दशदिनके दश पिंड देवै ॥ ५८ ॥ मैने जो तुमसो यह षोडश प्रथम कहो सो मलिन

वृषभंताडयेद्यस्तुनिर्दयोमुष्टियष्टिभिः ॥ सनरःकल्पपर्यन्तमुनक्तियमयातनाम् ॥ ५६ ॥ एवंकृत्वावृषोत्सर्गं कुर्याच्छ्राद्धानिषोडश ॥ सपिंडीकरणादर्वाक्तदहंकथयामिते ॥ ५७ ॥ स्थानेद्वारेर्धमार्गेचचितायांशवह स्तके ॥ अस्थिसंचयनेषष्ठोदशपिंडादशाह्निकाः ॥ ५८ ॥ मलिनंषोडशचैतत्प्रथमंपरिकीर्तितम् ॥ अन्यच्च षोडशंमध्येद्वितीयंकथयामिते ॥ ५९ ॥ प्रथमंविष्णवेदद्याद्वितीयंश्रीशिवायच ॥ याम्यायपरिवारायतृतीयंपि ण्डमुत्सृजेत् ॥६०॥ चतुर्थंसोमराजायहव्यवाहायपञ्चमम् ॥ कव्यवाहायषष्ठंचदद्यात्कालायसप्तमम् ॥ ६१॥ रुद्रायचाष्टमंदद्यान्नवमंपुरुषायच ॥ प्रेतायदशमंचैवैकादशंविष्णवेततः ॥ ६२ ॥

है औरहू दूसरो षोडश मध्यमें तुमसों कहौ हौं ॥ ५९ ॥ पहलो विष्णुके निमित्त देय और दूसरो श्रीशिवके निमित्त और तीसरो परिवार समेत यमके लिये पिंडदान करै ॥ ६० ॥ चौथो सोमराजके लिये और पंचम हव्यवाहके लिये छठा कव्यवाहके लिये और सातवाँ कालके निमित्त पिंडदान करै ॥ ६१ ॥ रुद्रके लिये आठवां पिंडदान

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

करै और नववाँ पुरुषके प्रेतके लिये दशमा और ग्यारहवां विष्णुके निमित्त दान करै ॥ ६२ ॥ बारहवां ब्रह्माके निमित्त और तेरहवां विष्णुके लिये चौदहवां शिवके लिये और पंद्रहवां यमके लिये पिंडदान करै ॥ ६३ ॥ हे गरुड ! सोलहवां पिंड वा पुरुषके लिये दान करै तत्त्वके जाननहारे पुरुष याको मध्यषोडशक कहै हैं ॥ ६४ ॥ बारहौं महीनेमें पाक्षिक त्रैपक्षिक और न्यूनषा

द्वादशंब्रह्मणेदद्याद्विष्णवेचत्रयोदशम ॥ चतुर्दशंशिवायैवयमायदशपञ्चकम् ॥ ६३ ॥ दद्यात्तत्पुरुषायैवपिण्डंषोडशकंखग ॥ मध्यंषोडशकंप्राहुरेतत्तत्त्वविदोजनाः ॥ ६४ ॥ द्वादशप्रतिमासेषुपाक्षिकंचत्रिपाक्षिकम् ॥ न्यूनषाण्मासिकंपिण्डंदद्यान्न्यूनाब्दिकंतथा ॥६५॥ उत्तमषोडशंचैतन्मयातेपरिकीर्तितम ॥ श्रपयित्वाचरुंताक्ष्यंकुर्यादेकादशाहनि ॥ ६६ ॥ चत्वारिंशत्तथैवाष्टौश्राद्धंप्रेतत्वनाशनम ॥ यस्यजातंविधानेनसभवेत्पितृपंक्तिभाक् ॥ ६७ ॥ पितृपंक्तिप्रवेशार्थंकारयेत्षोडशत्रयम् ॥ एतच्छ्राद्धविहीनश्चेत्प्रेतोभवतिसुस्थिरम ॥ ६८ ॥

ण्मासिक पिंड तथा न्यूनाब्दिक पिंडको दान करै ॥ ६५ ॥ यह उत्तम षोडश मैंने तुमसों कहो हे गरुड ! खीरको पककरि ग्यारहेंदिन करै ॥ ६६ ॥ चालीस और आठ कहिये ४८ श्राद्ध प्रेतपनके नाश करनहारे जाके ये विधिपूर्वक होय हैं वह पितरनकी पंक्तिमें गिनो जाय है ॥६७॥ पितरनकी पंक्तिमें प्रवेश करनेके लिये षोडशत्रय करावे वा श्राद्धकरिकै जो हीन है वह सुस्थिर प्रेत होय है॥६८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

षोडशत्रय है संज्ञा जाकी ऐसो श्राद्ध जबलौं नहीं दियो जाय है तबलौं स्वदत्त कहिये अपनो दियो और परदत्त कहिये दूसरेको दियो नहीं प्राप्त होय है ॥६९॥ तातें पुत्रकरि विधिसों षोडशत्रय करनो चाहिये और भर्ताको जो पत्नी करै तौ वाको अनंत कल्याणहोय ॥ ७० ॥ जो स्त्री मरेभये पतिको और्ध्वदेहिक कर्म करै है अर्थात् क्षयाह और पाक्षिक श्राद्ध वह मुझकरिकै सती कही जाती है

यावन्नदीयतेश्राद्धंषोडशत्रयसंज्ञकम् ॥ स्वदत्तंपरदत्तंचतावन्नैवोपतिष्ठते ॥ ६९ ॥ तस्मात्पुत्रेणकर्तव्यंविधिनाषोडशत्रयम् ॥ भर्तुर्वाकुरुतेपत्नीतस्याःश्रेयोह्यनन्तकम् ॥७०॥ संपरेतस्ययापत्युः कुरुतेचौर्ध्वदेहिकम् ॥ क्षयाहंपाक्षिकश्राद्धंसासतीह्युच्यतेमया ॥ ७१ ॥ उपकारायसाभर्तुर्जीवत्यैषापतिव्रता ॥ जीवितंसफलंतस्यायामृतंस्वामिनंभजेत् ॥ ७२ ॥ अथकश्चित्प्रमादेनम्रियतेवह्निवारिभिः ॥ संस्कारप्रमुखंकर्मसर्वंकुर्याद्यथाविधि ॥ ७३ ॥ प्रमादादिच्छयावापिनागाद्वाम्रियतेयदि ॥ पक्षयोरुभयोर्नागंपञ्चमीषुप्रपूजयेत् ॥ ७४ ॥

॥ ७१ ॥ वह पतिव्रता जो जीवै है वह भर्ताके उपकारके लिये जीवै है वाको जीवनो सफल है जो मरेभये स्वामीको भजती है ॥७२॥ और जो कोई प्रमादसों आगि वा जलसों मरिजाय ताको संस्कार आदि सब कर्म विधिपूर्वक करै॥७३॥प्रमादसों इच्छाकरिकै अथवा साँपसे जो मनुष्य मरै तो दोनों पक्षनमें ५ तिथिमें नागको पूजन करै ॥ ७४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पृथिवीमें सर्पके शरीरकी आकृति चूनकी बनावे ताकों सफेद फूलनसों और सुगंधी तथा चंदनसों पूजै ॥ ७५ ॥ धूप दीप दे और तंडुलनको और तिलनको डारै कच्चो पिसोभयो नैवेद्य और दूध निवेदन करै ॥७६॥ शक्तिके अनुसार सुवर्णको नाग और गो ब्राह्मणको दान करै ता पीछे हाथ जोरिकै नागराज प्रसन्न होउ ऐसे कहै ॥ ७७ ॥ फिरि उनकी नारायणबलिकी क्रिया करै वाको करिकै

कुर्यात्पिष्टमयींलेख्यांनागभोगाकृतिंभुवि ॥ अर्चयेत्तांसितैः पुष्पैःसुगन्धैश्चन्दनेनच ॥ ७५ ॥ प्रदद्याद्धूपदीपौचतण्डुलांश्चतिलान्क्षिपेत् ॥ आमपिष्टंचनैवेद्यक्षीरंचविनिवेदयेत् ॥ ७६ ॥ सौवर्णंशक्तितोनागंगांचदद्याद्द्विजन्मने ॥ कृतांजलिस्ततोब्रूयात्प्रीयतान्नागराडिति ॥ ७७ ॥ पुनस्तेषांप्रकुर्वीतनारायणबलिक्रियाम् ॥ तयालभन्तेस्वर्वासंमुच्यन्तेसर्वपातकैः ॥ ७८ ॥ एवंसर्वंक्रियांकृत्वाघटंसान्नंजलान्वितम् ॥ दद्यादाब्दंयथासंख्यान्पिण्डान्वासजलान्क्रमात् ॥ ७९ ॥ एवमेकादशेकृत्वाकुर्यात्सापिंडनंततः ॥ शय्यापदानांदानंच कारयेत्सूतकेगते ॥ ८० ॥ इति श्रीगरुडपुराणे सारोद्धारे द्वादशोऽध्यायः ॥ १२ ॥

स्वर्गवासको पावै है और सब पापनतें छूटि जायहै ॥ ७८ ॥ या प्रकार सब क्रिया करिकै अन्न तथा जल समेत घट वर्षपर्यंत दानकरै अथवा अर्घ्य समेत क्रमसों पिंड देय ॥ ७९ ॥ ऐसे एकादशमें दिन करिकै ता पीछे सपिंडन करै और सूतकके जानेपै शय्या तथा पदनको दान करै ॥ ८० ॥ इति श्रीगरुडपुराणसारोद्धारभाषाटीकायां द्वादशोऽध्यायः ॥ १२ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गरुड बोले, सपिंडनकी विधि कहौ और सूतकको निर्णय कहौ और शय्या तथा पदनकी सामग्रीको और हे प्रभो ! उनकी महिमाको कहौ ॥१॥ श्रीभगवान् बोले, हे गरुड ! सुनो सापिण्ड्य आदि संपूर्ण क्रिया मैं तुमसों कहौंहौं जा क्रियासों प्राणी प्रेतको नाम छोडिकै पितृगणमें प्रवेश करैहै ॥२॥ जिनको पिण्ड पितामह शिव आदिकनमें नहीं मिलो है उनको पुत्रकरिकै दिये भये नानाप्रकारके दान

गरुडउवाच ॥ ॥ सपिण्डनविधिंब्रूहिसूतकस्यचनिर्णयम् ॥ शय्यापदानांसामग्रींतेषांचमहिमांप्रभो ॥ १ ॥ श्रीभगवानुवाच ॥ शृणुताक्ष्यंप्रवक्ष्यामिसापिंड्याद्यखिलांक्रियाम् ॥ प्रेतनामपरित्यज्ययथापितृगणेविशेत ॥ २ ॥ नपिण्डोमिलितोयेषांपितामहशिवादिषु ॥ नोपतिष्ठन्तिदानानिपुत्रैर्दत्तान्यनेकधा ॥ ३ ॥ अशुद्धः स्यात्सदापुत्रोनशुध्यतिकदाचन ॥ सूतकंननिवर्तेतसपिण्डीकरणंविना ॥ ४ ॥ तस्मात्पुत्रेणकर्तव्यंसूतकान्तेसपिण्डनम् ॥ सूतकंतेप्रवक्ष्यामिसर्वेषांचयथोचितम् ॥ ५ ॥ ब्राह्मणस्तुदशाहेनक्षत्रियोद्वादशेहनि ॥ वैश्यः पञ्चदशाहेनशूद्रोमासेनशुध्यति ॥ ६ ॥

नहीं मिलैं हैं ॥३॥ पुत्र सदा अशुद्ध रहै है कदाचन शुद्ध नहीं होय है कारण यह है कि सपिंडी करनेके विना सूतक नहीं जायहै ॥४॥ तातें पुत्रको सूतकके अंतमें सपिण्डन करनो चाहिये और सबको यथोचित सूतक मैं तुमसों कहौंहौं ॥५॥ ब्राह्मण तौ दश दिनकरिकै और

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षत्रिय बारह दिनकरिकै वैश्य पंद्रह दिनकरिक और शूद्र एक महीनेकरिकै शुद्ध होय है॥ ६॥ दश दिनकरिकै सपिंड प्रेतके सूतकमें शुद्ध होय हैं और कुलके लोग तीनि रात्रिमें शुद्ध होय हैं और गोत्रके स्नानकरिकै शुद्ध होयहैं ॥ ७॥ चौथी पीढीमें दशरात्रिलों सूतक रहैहै और पांचमी पीढीमें छःरात्रि और छठी पीढीमें चारदिन और सातमीमें तीनि [illegible]न सूतक रहै है॥ ८॥

दशाहेनसपिण्डास्तुशुध्यन्तिप्रेतसूतके ॥ त्रिरात्रेणसकुल्यास्तुस्नात्वाशुद्ध्यन्तिगोत्रजाः ॥७॥ चतुर्थेदशरात्रंस्यात्षण्निशाः पुंसिपञ्चमे ॥ षष्ठेचतुरहःप्रोक्तसप्तमचदिनत्रयम् ॥ ८॥ अष्टमदिनमकृतुनवमेप्रहरद्वयम् ॥ दशमेस्नानमात्रंहिमृतकजन्मसूतकम् ॥ ९॥ देशान्तरगतःकश्चिच्छृणुयाद्योह्यहर्निशम ॥ यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत् ॥ १०॥ अतिक्रान्तेदशाहेतुत्रिरात्रमशुचिर्भवेत ॥ संवत्सरेव्यतीतेतुस्नानमात्राद्विशुध्यति ॥ ११॥ आद्यभागद्वययावन्मृतकस्यचसूतक ॥ द्वितीयेपतितेचाद्यात्सूतकाच्छुद्धिरिष्यते ॥ १२॥

आठमीमें एक दिन नवमीमें दो पहर और दशमीमें स्नान करनेहीसों मृतकसूतक और जन्मसूतक जायँ हैं॥९॥ परदेशमें गयोभयो कोई जो दशदिनके भीतर सुनै तौ दशरात्रिमें जो बाकी दिन रहैं उतनाही सूतक जानिये ॥ १०॥ दश दिनके बीति जानेपै वर्षसों पहले तीनि रात्रिको सूतक जानिये और वर्षके बीतिजानेपर स्नानमात्रतें शुद्ध होय है॥ ११॥ मृतकके सूतकके पहले दो भाग बीति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जानेपर जो दूसरो सूतक होय तौ पहले सूतकते शुद्धि कही है॥ १२ ॥ बालकके दांत उत्पन्न होनेसों पहले सद्यःशौंच अर्थात् स्नानमात्रहीसो शुद्धि होयहै और मुंडनपर्यंत एकरात्रि कहीहै और यज्ञोपवीतपर्यन्त तीनिरात्रियाते परे दशरात्रिमें शुद्धि होयहै॥१३॥ जन्मसों लगाके मुंडनपर्यंत जो कन्या मरजाय तो सब वर्णनमें सदा सद्यःशौच अर्थात स्नानमात्रसों शुद्धि होय हैं ॥१४॥ ता पीछे वाग्दानपर्यंत अर्थात् सगाईलौं एकही दिनको सूतक होयहै यातेपरे बढीभई कन्याको तीनिरात्रिको सूतक होय है यह निश्चयहै॥१५॥

आदन्तजननात्सद्यआचौलान्नैशिकीस्मृता ॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ १३ ॥ आजन्मनस्तु चौलान्तंयत्रकन्यापिपद्यते सद्यः शौचभवेत्तत्रसर्ववर्णेषुनित्यशः ॥ १४ ॥ ततोवाग्दानपर्यन्तंयावदेकाह मेवहि ॥ अतः परं प्रवृद्धानांत्रिरात्रमितिनिश्चयः ॥ १५ ॥ वाक्प्रदानेकृतेत्वत्रज्ञेयंचोभयतस्त्र्यहम् ॥ पितुर्वर स्यचततोदत्तानांभर्तुरेवहि ॥ १६ ॥ षण्मासाभ्यन्तरेयावद्गर्भस्रावोभवेद्यदि ॥ तदामाससमैस्तासां दिवसैःशुद्धिरिष्यते ॥ १७ ॥

और वाग्दान करनेपर तौ दोनों ओर तीनिदिनको जानिये अर्थात् तीनिदिनको पिताके कुलमें और तीनिदिनको वरके कुलमें सूतक जानिये और जो ब्याहीभई हैं उनको सूतक भर्ताहीके कुलमें होयहै पिताकेमें नहीं होय है॥ १६ ॥ छः महीनेके भीतर जो गर्भस्राव होय तौ उनकी महीननके बराबर दिननमें शुद्धि कहीहै अर्थात् जितने महीनेको गर्भ होय उतनेही दिननमें शुद्धि होयहै ॥१७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

